पृथिवी । शान्तिः । अन्तरिक्षम् । शान्तिः । द्यौः । शान्तिः । आपः । शान्तिः । ओषधयः । शान्तिः । वनस्पतयः । शान्तिः । विश्वे । मे । देवाः । शान्तिः । सर्वे । मे । देवाः । शान्तिः । शान्तिः । शान्तिः । शान्तिऽभिः । ताभिः । शान्तिऽभिः । सर्वे । शान्तिऽभिः । शम् । अयामः । अहम् । यत् । इह । घोरम् । यत् । इह । क्रूरम् । यत् । इह । पापम् । तत् । शान्तम् । तत् । शिवम् । सर्वम् । एव । शम् । अस्तु । नः ॥ १४ ॥

(१०) दशमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य ब्रह्मा ऋषिः । मन्त्रोक्ता देवताः । त्रिष्टुप् छन्दः ॥

शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥१॥

शम् । नः । इन्द्राग्नी इति । भवताम् । अवःऽभिः । शम् । नः । इन्द्रावरुणा । रातऽहव्या । शम् । इन्द्रासोमा । सुविताय । शम् । योः । शम् । नः । इन्द्रापूषणा । वाजऽसातौ ॥ १ ॥

XIX.9.12 Divine Supreme, the Lord of Creatures, the sustainer, the seven worlds, Vedas (sacred knowledge), the seven seers, the adorable leaders--by them my progress and safety has been secured. May the resplendent Lord grant me happiness; may the Lord of knowledge grant me happiness; may all the enlightened ones grant me happiness; may all the bounties of Nature grant me happiness.

XIX.9.13 May world's all the peace giving things whatsoever, which the seven-seers know, be peace-giving to me; may there be peace for me; may there be freedom from fear for me.

XIX.9.14 May the earth (grant) peace, the midspace peace, the sky peace, the waters peace, the herbs peace, forest-trees peace; all the enlightened one (grant) me peace; all the bounties of Nature (grant) me peace. May the peace be real peace with all sorts of peace. With those peaces, with complete peaces, we hereby appease what is dreadful here, what is cruel here. What is sinful here, that has been appeased, that has become blessed. May everything be peace-giving to us.

For prosperity and well-being

XIX.10.1 May the sun and fire, with their blessing aids, be for our happiness, may the sun and the ocean, to whom homage is offered, be for our happiness; may the sun and moon be for our happiness and comfort, along with prosperity; may the sun and sustenance be for our happiness in life-struggles. (Rg.VII.35.1)

शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥२॥
शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ॥३॥
शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम् ।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ॥४॥
शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ॥५॥
शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥६॥
शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः ।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः शम्वस्तु वेदिः ॥७॥

शम् । नः । भगः । शम् । ऊं इति । नः । शंसः । _स्तु । शम् । नः । पुरम्ऽधिः ।
शम । ऊं इति । सन्तु । रायः । शम् । नः । सत्यस्य । सुऽयमस्य । शंसः । शम् । नः ।
अर्यमा । पुरुऽजातः । अस्तु ॥ २ ॥
शम् । नः । धाता । शम् । ऊं इति । धर्ता । नः । अस्तु । शम् । नः । उरूची ।
भवतु । स्वधाभिः । शम् । रोदसी इति । बृहती इति । शम् । नः । अद्रिः । शम् । नः ।
देवानाम् । सुऽहवानि । सन्तु ॥ ३ ॥
शम् । नः । अग्निः । ज्योतिःऽअनीकः । अस्तु । शम् । नः । मित्रावरुणौ । अश्विना । शम् ।
शम् । नः । सुऽकृताम् । सुऽकृतानि । सन्तु । शम् । नः । इषिरः । अभि । वातु । वातः ॥ ४ ॥
शम् । नः । द्यावापृथिवी इति । पूर्वऽहूतौ । शम् । अन्तरिक्षम् । दृशये । नः । अस्तु ।
शम् । नः । ओषधीः । वनिनः । भवन्तु । शम् । नः । रजसः । पतिः । अस्तु । जिष्णुः ॥५॥
शम् । नः । इन्द्रः । वसुऽभिः । देवः । अस्तु । शम् । आदित्येभिः । वरुणः । सुऽशंसः ।
शम् । नः । रुद्रः । रुद्रेभिः । जलाषः । शम् । नः । त्वष्टा । ग्नाभिः । इह । शृणोतु ॥६॥
शम् । नः । सोमः । भवतु । ब्रह्म । शम् । नः । शम् । नः । ग्रावाणः । शम् । ऊं इति ।
सन्तु । यज्ञाः । शम् । नः । स्वरूणाम् । मितयः । भवन्तु । शम् । नः । प्रऽस्वः । शम् ।
ऊं इति । अस्तु । वेदिः ॥

XIX.10.2 May the prosperity be for our happiness; may the discipline be for happiness; may the intellectual pursuits be for our happiness; may the riches be for happiness; may the variously-manifested law and order be for our happiness. (Rg.VII.35.2)

XIX.10.3 May the people of creativity be for happiness; may the people in charge of sustenance be for our happiness; may the wide earth, with its provisions be for our happiness; may the vast heaven and earth be for happiness; may the mountains be for happiness; may our pious invocations of Nature's bounties secure happiness for us. (Rg.VII.35.3)

XIX.10.4 May the fire, with the splendour of countenance, be for our happiness; may the cosmic light and plasma, and the pair of twins-divine be for our happiness. May the noble actions of the pious be for our happiness; may the impetuous wind blow for our happiness. (Rg.VII.35.4)

XIX.10.5 May the heaven and earth, invoked from the earliest times, be for our happiness; may the midspace be for our happiness with charming appearance. May the herbs and the forest trees be for our happiness; may the victorious Lord of the distant regions, be favourable to our felicity. (Rg.VII.35.5)

XIX.10.6 May the divine sun, with the life-giving elements, grant us happiness; may the justly-praised ethereal ocean with numerous suns, be friendly to our happiness; may the grief-assuaging cosmic vitality, with the vital breaths, bless us for our happiness; may the architect of the universe, with attributes of Nature's bounties, be with us for our happiness, and hear us at this solemnity. (Rg.VII.35.6)

XIX.10.7 May be the source of our happiness; may the prayers promote our happiness: may the clouds be source of our happiness. May the sacred work and worship be source of our happiness; may the measured lengths of the pillars of ceremonial hall be conducive to our felicity; may the well-grown herbs be for our happiness; may the altar be raised for our happiness. (Rg.VII.35.7)

शं नः सूर्य उरुचक्षा उदेतु शं नो भवन्तु प्रदिशश्चतस्रः ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥८॥
शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥९॥
शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः ॥१०॥

शम् । नः । सूर्यः । उरुऽचक्षाः । उत् । एतु । शम् । नः । भवन्तु । प्रऽदिशः । चतस्रः ।
शम् । नः । पर्वताः । ध्रुवयः । भवन्तु । शम् । नः । सिन्धवः । शम् । ऊं इति । सन्तु । आपः ॥
शम् । नः । अदितिः । भवतु । व्रतेभिः । शम् । नः । भवन्तु । मरुतः । सुऽअर्काः । शम् । नः ।
विष्णुः । शम् । ऊं इति । पूषा । नः । अस्तु । शम् । नः । भवित्रम् । शम् । ऊं इति । अस्तु । वायुः ॥
शम् । नः । देवः । सविता । त्रायमाणः । शम् । नः । भवन्तु । उषसः । विऽभातीः । शम् ।
नः । पर्जन्यः । भवतु । प्रऽजाभ्यः । शम् । नः । क्षेत्रस्य । पतिः । अस्तु । शम्ऽभुः ॥ १० ॥

(११) एकादशं सूक्तम्

(१-६) षड्ऋचस्यास्य सूक्तस्य ब्रह्मा ऋषिः । मन्त्रोक्ता देवताः । त्रिष्टुप् छन्दः ॥

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥१॥
शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥२॥

शम् । नः । सत्यस्य । पतयः । भवन्तु । शम् । नः । अर्वन्तः । शम् । ऊं इति । सन्तु ।
गावः । शम् । नः । ऋभवः । सुऽकृतः । सुऽहस्ताः । शम् । नः । भवन्तु । पितरः । हवेषु ॥
शम् । नः । देवाः । विश्वऽदेवाः । भवन्तु । शम् । सरस्वती । सह । धीभिः । अस्तु ।
शम् । अभिऽसाचः । शम् । ऊं इति । रातिऽसाचः । शम् । नः । दिव्याः । पार्थिवाः ।
शम् । नः । अप्याः ॥ २ ॥

XIX.10.8 May the sun with extensive radiance rise for our happiness; may the four quarters of the horizon be auspicious to us. May the firm-set mountains bless us for our happiness; may the rivers, may the waters be for our happiness. (Rg.VII.35.8)

XIX.10.9 May the mother infinity, through holy observances, be for our happiness; may the glowing vital principles be for our happiness; may the all pervading one, the nourishing one, be for our happiness; may the cosmic waters be propitious to us; may the wind blow for our happiness. (Rg.VII.35.9)

XIX.10.10 May the divine refulgent Lord, the saviour, be for our happiness; may the radiant dawns be propitious to us. May the clouds be propitious for our people; may the sovereign Lord of universe bless us for happiness. (Rg.VII.35.10)

For well-being

XIX.11.1 May the sustainers of eternal truths be propitious to our happiness; may the horses, the cattle, contribute to our happiness; may the virtuous, the dexterous men of experience and wisdom, confer felicity on us; may the senior sages be kind to us and respond to our invocations in rituals and ceremonies. (Rg.VII.35.12)

XIX.11.2 May all the divine Nature's bounties be for our happiness; may the divine speech, with holy thoughts' be gracious; may the persons assisting at our sacred works and those whc liberally and large-heartedly give, be conducive to our happiness; may all celestial, terrestrial, and aquatic powers be for our happiness. (Rg.VII.35.11)

शं नो॑ अ॒ज एक॑पाद्दे॒वो अ॑स्तु॒ शमहि॑र्बु॒ध्न्य१ः॒ शं स॑मु॒द्रः ।
शं नो॑ अ॒पां नपा॑त्पे॒रुर॑स्तु॒ शं नः॒ पृश्नि॑र्भवतु दे॒वगो॑पा ॥३॥
आ॒दि॒त्या रु॒द्रा वस॑वो जुषन्ता॒मि॒दं ब्रह्म॑ क्रि॒यमा॑णं॒ नवी॑यः ।
शृ॒ण्वन्तु॑ नो दि॒व्याः पार्थि॑वासो॒ गोजा॑ता उ॒त ये य॒ज्ञिया॑सः ॥४॥
ये दे॒वाना॑मृ॒त्विजो॑ य॒ज्ञिया॑सो॒ मनो॒र्यज॑त्रा अ॒मृता॑ ऋत॒ज्ञाः ।
ते नो॑ रासन्तामुरुगा॒यम॒द्य यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥५॥
तद॑स्तु मित्रावरुणा॒ तद॑ग्ने॒ शं योर॒स्मभ्य॑मि॒दम॑स्तु श॒स्तम् ।
अ॒शी॒महि॑ गा॒धमु॒त प्र॑ति॒ष्ठां नमो॑ दि॒वे बृ॑ह॒ते साद॑नाय ॥६॥

शम् । न॒ः । अ॒जः । एक॑ऽपात् । दे॒वः । अ॒स्तु॒ । शम् । अहि॑ः । बु॒ध्न्य॑ः । शम् । स॒मु॒द्रः ।
शम् । न॒ः । अ॒पाम् । नपा॑त् । पे॒रुः । अ॒स्तु॒ । शम् । न॒ः । पृश्नि॑ः । भ॒व॒तु॒ । दे॒वऽगो॑पा ॥
आ॒दि॒त्याः । रु॒द्राः । वस॑वः । जु॒ष॒न्ता॒म् । इ॒दम् । ब्रह्म॑ । क्रि॒यमा॑णम् । नवी॑यः ।
शृ॒ण्वन्तु॑ । न॒ः । दि॒व्याः । पार्थि॑वासः । गोऽजा॑ताः । उ॒त । ये । य॒ज्ञिया॑सः ॥ ४ ॥
ये । दे॒वाना॑म् । ऋ॒त्विज॑ः । य॒ज्ञिया॑सः । मनो॑ः । यज॑त्राः । अ॒मृता॑ः । ऋ॒त॒ऽज्ञाः । ते ।
न॒ः । रा॒स॒न्ता॒म् । उ॒रु॒ऽगा॒यम् । अ॒द्य । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभि॑ः । सदा॑ । न॒ः ॥ ५ ॥
तत् । अ॒स्तु॒ । मि॒त्रा॒व॒रु॒णा॒ । तत् । अ॒ग्ने॒ । शम् । योः । अ॒स्मभ्य॑म् । इ॒दम् । अ॒स्तु॒ । श॒स्तम् ।
अ॒शी॒महि॑ । गा॒धम् । उ॒त । प्र॒ति॒ऽस्थाम् । नम॑ः । दि॒वे । बृ॒ह॒ते । सद॑नाय ॥ ६ ॥

(१२) द्वादशं सूक्तम्

(१) एकर्चस्यास्य सूक्तस्य ब्रह्मा ऋषिः । मन्त्रोक्ता देवता । त्रिष्टुप् छन्दः ॥

उ॒षा अप॒ स्वसु॒स्तम॒ः सं व॑र्तयति वर्त॒निं सु॑जा॒तता॑ ।
अ॒या वाजं॑ दे॒वहि॑तं सनेम॒ मदे॑म श॒तहि॑माः सु॒वीरा॑ः ॥१॥

उ॒षाः । अप॑ । स्वसु॑ः । तम॑ः । सम् । व॒र्त॒य॒ति॒ । व॒र्त॒निम् । सु॒ऽजा॒तता॑ ।
अ॒या । वाज॑म् । दे॒वऽहि॑तम् । स॒ने॒म॒ । मदे॑म । श॒तऽहि॑माः । सु॒ऽवीरा॑ः ॥ १ ॥

XIX.11.3 May the divine unborn Lord, the one-footed (in whose one foot measure is the entire universe) bless us for our happiness; may the clouds of midspace confer happiness; may the cosmic oceans be for happiness; may the heat and electricity, born of water, be gracious, and may the midspace, the sky, guarded by divine powers, be for our happiness. (Rg.VII.35.13)

XIX.11.4 May the Cosmic suns, the cosmic winds, and the planets of abode be gratified by this new hymn, which we now repeat; may all the divines of celestial and terrestrial worlds, progeny of cows, and those who perform worship, hear our invocations. (Rg.VII.35.14)

XIX.11.5 May those, who are most adorable among divinely revered, those who have been honoured by all men, those who are immortal, the observers of truth, grant us today widely-spoken reputation, and may you, O Lord, along with the divine forces, ever cherish us with blessings. (Rg.VII.35.15)

XIX.11.6 May this our praise, O Lord of light and bliss, be appreciated by you. May it, O adorable Lord, be valued by you, as the means of health and happiness to us. May we then obtain depth (of life) and stability. We offer reverence to the vast celestial region. (Rg.V.47.7)

To Ushās (dawn)

XIX.12.1 The dawn drives away the gloom of her sister (the night) and through her noble birth illumines the pathway well. Through her, may we win the treasure, beneficial for the enlightened ones; blessed with brave progeny, may we revel through a hundred winters. (Rg.X.172.4; VI.17.15)

(१३) त्रयोदशं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्याप्रतिरथ ऋषिः । इन्द्रो देवता । (१-२, ७-१०) प्रथमाद्वितीययोर्ऋचोः सप्तम्यादिचतसृणाञ्च त्रिष्टुप्, (३-६, ११) तृतीयादिचतसृणामेकादश्याश्च भुरिक्त्रिष्टुप् छन्दसी ॥

इन्द्रस्य बाहू स्थविरौ वृषाणौ चित्रा इमा वृषभौ पारयिष्णू ।
तौ योक्षे प्रथमो योग आगते याभ्यां जितमसुराणां स्व१र्यत् ॥१॥
आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥२॥
संक्रन्दनेनानिमिषेण जिष्णुनायोध्येन दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥३॥
स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित्सोमपा बाहुशर्ध्यु१ग्रधन्वा प्रतिहिताभिरस्ता ॥४॥
बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
अभिवीरो अभिषत्वा सहोजिज्जैत्रमिन्द्र रथमा तिष्ठ गोविदन् ॥५॥
इमं वीरमनु हर्षध्वमुग्रमिन्द्रं सखायो अनु सं रभध्वम् ।
ग्रामजितं गोजितं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ॥६॥

इन्द्रस्य । बाहू इति । स्थविरौ । वृषाणौ । चित्रा । इमा । वृषभौ । पारयिष्णू इति ।
तौ । योक्षे । प्रथमः । योगे । आऽगते । याभ्याम् । जितम् । असुराणाम् । स्वः । यत् ॥
आशुः । शिशानः । वृषभः । न । भीमः । घनाघनः । क्षोभणः । चर्षणीनाम् ।
सम्ऽक्रन्दनः । अनिऽमिषः । एकऽवीरः । शतम् । सेनाः । अजयत् । साकम् । इन्द्रः ॥ २ ॥
सम्ऽक्रन्दनेन । अनिऽमिषेण । जिष्णुना । अयोध्येन । दुःऽच्यवनेन । धृष्णुना ।
तत् । इन्द्रेण । जयत । तत् । सहध्वम् । युधः । नरः । इषुऽहस्तेन । वृष्णा ॥ ३ ॥
सः । इषुऽहस्तैः । सः । निषङ्गिऽभिः । वशी । सम्ऽस्रष्टा । सः । युधः । इन्द्रः । गणेन ।
संसृष्टऽजित् । सोमऽपाः । बाहुऽशर्धी । उग्रऽधन्वा । प्रतिऽहिताभिः । अस्ता ॥ ४ ॥
बलऽविज्ञायः । स्थविरः । प्रऽवीरः । सहस्वान् । वाजी । सहमानः । उग्रः ।
अभिऽवीरः । अभिऽसत्वा । सहःऽजित् । जैत्रम् । इन्द्र । रथम् । आ । तिष्ठ । गोऽविदम् ॥
इमम् । वीरम् । अनु । हर्षध्वम् । उग्रम् । इन्द्रम् । सखायः । अनु । सम् । रभध्वम् ।
ग्रामऽजितम् । गोऽजितम् । वज्रऽबाहुम् । जयन्तम् । अज्म । प्रऽमृणन्तम् । ओजसा ॥ ६ ॥

For aid and victory in battles.

XIX.13.1 The two of the resplendent Lord are two sturdy, mighty, wonderful bulls, capable of carrying us across the difficulties; when the need arises, first of all I shall yoke them, by whom the heaven of the life-destroyers was conquered.

XIX.13.2 Quick, striking with sharpened bolt, terrible like a bull, destroyer of enemies on a large scale, arouser of people, making the sinful persons cry, never negligent, the unique here, the resplendent one (the army-chief) conquers a hundred invading armies at a time. (Yv. XVII.33)

XIX.13.3 With him, the army-chief, who makes the enemies weep, who is ever-watchful;, victorious, spoiling for battle, unconquerable, fearless and strong, and who bears arrows in his hand, O soldiers, may you gain victories and win battles. (Yv. XVII.34)

XIX.13.4 That army-chief, commanding the soldiers who carry arrows and quivers, organizes them into battalions and with them he captures enemies. He, the enjoyer of the herbal drinks, depending on the strength of his arms only, carrying a mighty bow, scatters the hosts of united enemies with his well-shot arrows. (Yv. XVII.35)

XIX.13.5 O resplendent one (army-chief), having full information of the opposing army, senior-most, valiant, full of strength, agile, overwhelming the foes, formidable, ready to engage every warrior, surrounded by servants, born out of strength as if, appreciator of praises, may you mount your conquering chariot now. (Yv. XVII.37)

XIX.13.6 Be thrilled with joy following this formidable hero, O friends; make determined effort following him, the conqueror of troops, winner of cows, thunder-armed, victor in battles and slaughtering with tremendous force.

अभि गोत्राणि सहसा गाहमानोदाय उग्रः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयोध्योऽस्माकं सेना अवतु प्र युत्सु ॥७॥
बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जञ्छत्रून्प्रमृणन्नमित्रानस्माकमेध्यविता तनूनाम् ॥८॥
इन्द्र एषां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्तु मध्ये ॥९॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥१०॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्मान्देवासोवता हवेषु ॥११॥

अभि । गोत्राणि । सहसा । गाहमानः । अदायः । उग्रः । शतऽमन्युः । इन्द्रः ।
दुःऽच्यवनः । पृतनाषाट् । अयोध्यः । अस्माकम् । सेनाः । अवतु । प्र । युत्ऽसु ॥ ७ ॥
बृहस्पते । परि । दीय । रथेन । रक्षःऽहा । अमित्रान् । अपऽबाधमानः ।
प्रऽभञ्जन् । शत्रून् । प्रऽमृणन् । अमित्रान् । अस्माकम् । एधि । अविता । तनूनाम् ॥ ८ ॥
इन्द्रः । एषाम् । नेता । बृहस्पतिः । दक्षिणा । यज्ञः । पुरः । एतु । सोमः ।
देवऽसेनानाम् । अभिऽभञ्जतीनाम् । जयन्तीनाम् । मरुतः । यन्तु । मध्ये ॥ ९ ॥
इन्द्रस्य । वृष्णः । वरुणस्य । राज्ञः । आदित्यानाम् । मरुताम् । शर्धः । उग्रम् ।
महाऽमनसाम् । भुवनऽच्यवानाम् । घोषः । देवानाम् । जयताम् । उत् । अस्थात् ॥१०॥
अस्माकम् । इन्द्रः । समऽऋतेषु । ध्वजेषु । अस्माकम् । याः । इषवः । ताः । जयन्तु ।
अस्माकम् । वीराः । उत्ऽतरे । भवन्तु । अस्मान् । देवासः । अवत । हवेषु ॥ ११ ॥

(१४) चतुर्दशं सूक्तम्

(१) एकर्चस्यास्य सूक्तस्याथर्वा ऋषिः । द्यावापृथिव्यौ देवते । त्रिष्टुप् छन्दः ॥

इदमुच्छ्रेयोवसानमागां शिवे मे द्यावापृथिवी अभूताम् ।
असपत्नाः प्रदिशो मे भवन्तु न वै त्वा द्विष्मो अभयं नो अस्तु ॥१॥

इदम् । उत्ऽश्रेयः । अवऽसानम् । आ । अगाम् । शिवे इति । मे । द्यावापृथिवी इति ।
अभूताम् । असपत्नाः । प्रऽदिशः । मे । भवन्तु । न । वै । त्वा । द्विष्मः । अभयम् । नः । अस्तु ॥

XIX.13.7 May the resplendent one (army-chief), crushing the enemy clans with tremendous force, pitiless, valiant, quick to take offence, difficult to dislodge, vanquisher of armies, the matchless her, protect our armies in battles. (Yv. XVII.39)

XIX.13.8 O Lord of the large army, slayer of evil forces, harassing the enemies, may you go around far and wide with your chariot. Routing the opponent armies and conquering the violent foes in battles, may you become protector of our chariots. (Yv. XVII.36)

XIX.13.9 Let the resplendent one, the Commander of the large army, be their leader; let the self-sacrificing squad be on their right; let the units intoxicated with herbal drinks move to the fore. Let the brave infantry march in the forefront of the conquering and overwhelming armies of godly people. (Yv. XVII.40 Variation)

XIX.13.10 Fierce strength of the powerful army-chief of the venerable kind, and of the infantry, glittering like (many) suns, has come up. And up goes the shout of the winning godly people, big-hearted and capable of overturning the worlds. (Yv. XVII.41)

XIX.13.11 When the flags assemble in the battle-field, may our army-chief win; may those shafts win that are ours. may our warriors have an edge over the enemy; may the bounties of Nature protect us in the battles. (Yv. XVII.43)

For safety

XIX.14.1 I have reached this highly excellent end (of the journey). Heaven and earth have been auspicious to me. May the great quarters be free rivals for me. Surely, we do not hate you. Let there be no fear for us. (Rv. VIII.61.13 Variation)

(१५) पञ्चदशं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्याथर्वा ऋषिः। (१-४) प्रथमादिचतसृणामृचामिन्द्रः, (५-६) पञ्चमीषष्ठयोश्च मन्त्रोक्ता देवताः। (१) प्रथमायाः पथ्याबृहती, (२, ५) द्वितीयापञ्चम्योश्चतुष्पदा जगती, (३) तृतीयाया विराड्बृहत्यापङ्क्तिः, (४, ६) चतुर्थीषष्ठयोश्च त्रिष्टुप् छन्दांसि ॥

यत॑ इन्द्र॒ भया॑महे॒ ततो॑ नो॒ अभ॑यं कृधि ।
मघ॑वञ्छ॒ग्धि तव॒ त्वं न॑ ऊ॒तिभि॒र्वि द्विषो॒ वि मृधो॑ जहि ॥१॥
इन्द्रं॑ व॒यम॑नूरा॒धं ह॑वाम॒हेनु॑ राध्यास्म द्वि॒पदा॒ चतु॑ष्पदा ।
मा नः॒ सेना॒ अर॑रुषी॒रुप॑ गु॒र्विषू॑चीरिन्द्र द्रु॒हो वि ना॑शय ॥२॥
इन्द्र॑स्त्रा॒तोत वृ॑त्र॒हा प॑र॒स्फानो॒ वरे॑ण्यः ।
स र॑क्षि॒ता च॑र॒मतः॒ स म॑ध्य॒तः स प॒श्चात्स पु॒रस्ता॑न्नो अस्तु ॥३॥
उ॒रुं नो॑ लो॒कमनु॑ नेषि वि॒द्वान्त्स्व१र्यज्ज्योति॒रभ॑यं स्व॒स्ति ।
उ॒ग्रा त॑ इन्द्र॒ स्थवि॑रस्य बा॒हू उप॑ क्षयेम श॒रणा॑ बृ॒हन्ता॑ ॥४॥
अभ॑यं नः करत्य॒न्तरि॑क्ष॒मभ॑यं॒ द्यावा॑पृथि॒वी उ॒भे इ॒मे ।
अभ॑यं प॒श्चादभ॑यं पु॒रस्ता॑दुत्त॒राद॑ध॒राद॑भ॑यं नो अस्तु ॥५॥
अभ॑यं मि॒त्रादभ॑यम॒मित्रा॒दभ॑यं ज्ञा॒तादभ॑यं पु॒रो यः ।
अभ॑यं॒ नक्त॒मभ॑यं॒ दिवा॑ नः॒ सर्वा॒ आशा॒ मम॑ मि॒त्रं भ॑वन्तु ॥६॥

यतः॑ । इ॒न्द्र॒ । भया॑महे । ततः॑ । नः॒ । अभ॑यम् । कृ॒धि ।
मघ॑ऽवन् । श॒ग्धि । तव॑ । त्वम् । नः॒ । ऊ॒तिऽभिः॑ । वि । द्विषः॑ । वि । मृधः॑ । ज॒हि ॥
इन्द्र॑म् । व॒यम् । अ॒नु॒ऽरा॒धम् । ह॒वा॒म॒हे॒ । अनु॑ । रा॒ध्या॒स्म॒ । द्वि॒ऽपदा॑ । चतुः॑ऽपदा ।
मा । नः॒ । सेनाः॑ । अर॑रुषीः । उप॑ । गुः॒ । विषू॑चीः । इ॒न्द्र॒ । द्रु॒हः॒ । वि । ना॒श॒य॒ ॥ २ ॥
इन्द्रः॑ । त्रा॒ता । उ॒त । वृ॒त्र॒ऽहा । प॒र॒स्फानः॑ । वरे॑ण्यः ।
सः । र॒क्षि॒ता । च॒र॒मतः॑ । सः । म॒ध्य॒तः । सः । प॒श्चात् । सः । पु॒रस्ता॑त् । नः॒ । अ॒स्तु॒ ॥ ३ ॥
उ॒रुम् । नः॒ । लो॒कम् । अनु॑ । ने॒षि॒ । वि॒द्वान् । स्वः॑ । यत् । ज्योतिः॑ । अभ॑यम् । स्व॒स्ति ।
उ॒ग्रा । ते॒ । इ॒न्द्र॒ । स्थवि॑रस्य । बा॒हू इति॑ । उप॑ । क्ष॒ये॒म॒ । श॒र॒णा । बृ॒हन्ता॑ ॥ ४ ॥
अभ॑यम । नः॒ । क॒र॒ति॒ । अ॒न्तरि॑क्षम् । अभ॑यम् । द्यावा॑पृथि॒वी इति॑ । उ॒भे इति॑ । इ॒मे इति॑ ।
अभ॑यम् । प॒श्चात् । अभ॑यम् । पु॒रस्ता॑त् । उ॒त्ऽत॒रात् । अ॒ध॒रात् । अभ॑यम् । नः॒ । अ॒स्तु॒ ॥५॥
अभ॑यम् । मि॒त्रात । अभ॑यम । अ॒मित्रा॑त् । अभ॑यम् । ज्ञा॒तात् । अभ॑यम् । पु॒रः । यः ।
अभ॑यम् । नक्त॑म् । अभ॑यम् । दिवा॑ । नः॒ । सर्वाः॑ । आशाः॑ । मम॑ । मि॒त्रम । भ॒व॒न्तु॒ ॥ ६ ॥

For safety and success

XIX.15.1 Wherefrom, O resplendent Lord, we apprehend danger, therefrom may you make us safe and secure. O bounteous Lord, you are capable of it with your protective aids. May you destroy completely our haters and harmers.

XIX.15.2 We invoke the resplendent Lord, the granter of success. May we obtain success through bipeds and quadrupeds. Let not the armies of cruel foes approach us. O resplendent Lord, may you destroy vast hordes of enemies.

XIX.15.3 The resplendent Lord is the saviour as well as the destroyer of nescience; He is the defender against enemies and is the best to choose. May He be our protector at the extreme ends, He in the middle, He from the front and He from behind.

XIX.15.4 Knowing well, may you lead us to the spacious region, where there is heavenly light, freedom, fear and weal. May we take shelter, O resplendent Lord, mighty in battle, under your formidable arms, the great refuges. (Ṛg.VI.47.8. Variation)

XIX.15.5 May the midspace make us free from fear; free from fear, may both these heaven and earth be (for us). May there be no fear to us from behind, from the front, from above as well as from below.

XIX.15.6 May there be no fear from a friend;no fear from a foe; no fear from one known to us; no fear from the unknown one. May there be no fear at night, no fear in the day for us. May all the regions be friendly to me.

(१६) षोडशं सूक्तम्

(१-२) ब्रह्मास्यास्य सूक्तस्याथर्वा ऋषिः । मन्त्रोक्ता देवताः । (१) प्रथमर्चोऽनुष्टुप्, (२) द्वितीयायाश्च त्र्यवसाना सप्तपदा बृहतीगर्भातिशाक्वरी छन्दसी ॥

असपत्नं पुरस्तात्पश्चान्नो अभयं कृतम् ।
सविता मा दक्षिणत उत्तरान्मा शचीपतिः ॥१॥
दिवो मादित्या रक्षन्तु भूम्या रक्षन्त्वग्नयः ।
इन्द्राग्नी रक्षतां मा पुरस्तादश्विनावभितः शर्म यच्छताम् ।
तिरश्चीनघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतः सन्तु वर्म ॥२॥

असपत्नम् । पुरस्तात् । पश्चात् । नः । अभयम् । कृतम ।
सविता । मा । दक्षिणतः । उत्तरात् । मा । शचीऽपतिः ॥ १ ॥

दिवः । मा । आदित्याः । रक्षन्तु । भूम्याः । रक्षन्तु । अग्नयः ।
इन्द्राग्नी इति । रक्षताम् । मा । पुरस्तात् । अश्विनौ । अभितः । शर्म । यच्छताम् ।
तिरश्चीन् । अघ्न्या । रक्षतु । जातऽवेदाः । भूतऽकृतः । मे । सर्वतः । सन्तु । वर्म ॥ २ ॥

(१७) सप्तदशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्याथर्वा ऋषिः । मन्त्रोक्ता देवताः । [(१) प्रथमर्च उपजगती], (२-४) द्वितीयादितृचस्य [(८) अष्टम्याश्च] जगती, [(५) पञ्चम्याः स्वराड्जगती], (६) षष्ठया भुरिग्जगती, (७) सप्तम्या अतिजगती, [(९) नवम्याः पञ्चपदा विराडतिशाक्वरी, (१०) दशम्याश्च निचृदतिजगती] छन्दांसि ॥

अग्निर्मा पातु वसुभिः पुरस्तात्तस्मिन्क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि ।
स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥१॥
वायुर्मान्तरिक्षेणैतस्या दिशः पातु तस्मिन्क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि ।
स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥२॥

अग्निः । मा । पातु । वसुऽभिः । पुरस्तात् । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि । सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥१॥
वायुः । मा । अन्तरिक्षेण । एतस्याः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि । सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ २ ॥

To divinities for safety and protection

XIX.16.1 Freedom from rivals in the east and freedom from fear in the west has been secured for us. May the impeller Lord guard me from the south and the Lord of action from the north.

XIX.16.2 May the suns (of the twelve months) protect me from the sky; may the fires protect (me) from earth. May Lord resplendent and adorable protect me in front and the aśvins (twins divine) grant me protection on all sides. May the Lord cognizant of all protect our cows crosswise. May the creators of all beings be my armour on all sides.

To Various Gods for protection

XIX.17.1 May the adorable Lord (Agni) along with the Vasus (young sages) guard me from the east. I step in Him; in Him I take shelter; to that castle do I go. May He defend me; may He protect me. To Him I totally surrender myself. Svāhā (hail).

XIX.17.2 May the pervading Lord (Vāyu), along with the midspace, guard me from this direction (middle of the east and the south). I step in Him; in Him I take shelter; to that castle do I go. May He defend me; may He protect me. To Him I totally surrender myself. Svāhā.

सोमो मा रुद्रैर्दक्षिणाया दिशः पातु तस्मिन्क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि ।
स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥३॥
वरुणो मादित्यैरेतस्या दिशः पातु तस्मिन्क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि ।
स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥४॥
सूर्यो मा द्यावापृथिवीभ्यां प्रतीच्या दिशः पातु तस्मिन्क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि ।
स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥५॥
आपो मौषधीमतीरेतस्या दिशः पान्तु तासु क्रमे तासु श्रये तां पुरं प्रैमि ।
ता मा रक्षन्तु ता मा गोपायन्तु ताभ्य आत्मानं परि ददे स्वाहा ॥६॥
विश्वकर्मा मा सप्तऋषिभिरुदीच्या दिशः पातु तस्मिन्क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि ।
स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥७॥

सोमः । मा । रुद्रैः । दक्षिणायाः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि । सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ ३ ॥

वरुणः । मा । आदित्यैः । एतस्याः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि । सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ ४ ॥

सूर्यः । मा । द्यावापृथिवीभ्याम् । प्रतीच्याः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि । सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ ५ ॥

आपः । मा । ओषधीऽमतीः । एतस्याः । दिशः । पान्तु । तासु । क्रमे । तासु । श्रये । ताम् । पुरम् । प्र । एमि । ताः । मा । रक्षन्तु । ताः । मा । गोपायन्तु । ताभ्यः । आत्मानम् । परि । ददे । स्वाहा ॥ ६ ॥

विश्वऽकर्मा । मा । सप्तऋषिऽभिः । उदीच्याः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि । सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ ७ ॥

XIX.17.3 May the blissful Lord (Soma), along with Rudras (adult sages), guard me from the southern quarter. I step in Him; in Him I take shelter; to that castle do I go. May He defend me; may He protect me. To Him I totally surrender myself. Svāhā.

XIX.17.4 May the venerable Lord (Varuna), along with Ādityas (old sages), guard me from this direction (middle of the south and the west). I step in Him; in Him I take shelter; to that castle do I go. May He defend me; may He protect me. To Him I totally surrender myself. Svāhā.

XIX.17.5 May Sun (god), along with the heaven and earth, guard me from the western quarter. I step in Him; in Him I take shelter; to that castle do I go. May He defend me; may He protect me. To Him I totally surrender myself. Svāhā.

XIX.17.6 May Waters, along with the medicinal plants, guard me from this direction (middle of the west and the north). I step in Him; in Him I take shelter; to that castle do I go. May He defend me; may He protect me. To Him I totally surrender myself. Svāhā.

XIX.17.7 May the universal Architect, along with the seven seers, guard me from the northern quarter. I step in Him; in Him I take shelter; to that castle do I go. May He defend me; may He protect me. To Him I totally surrender myself. Svāhā.

इन्द्रो मा मरुत्वानेतस्या दिशः पातु तस्मिन्क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि ।
स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥८॥
प्रजापतिर्मा प्रजननवान्त्सह प्रतिष्ठाया ध्रुवाया दिशः पातु तस्मिन्क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि ।
स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥९॥
बृहस्पतिर्मा विश्वैर्देवैरूर्ध्वाया दिशः पातु तस्मिन्क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि ।
स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥१०॥

इन्द्रः । मा । मरुत्ऽवान् । एतस्याः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि । सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ ८ ॥

प्रजाऽपतिः । मा । प्रजननऽवान् । सह । प्रतिऽस्थया । ध्रुवायाः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि । सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ ९ ॥

बृहस्पतिः । मा । विश्वैः । देवैः । ऊर्ध्वायाः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि । सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ १० ॥

(१८) अष्टादशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य अथर्वा ऋषिः । मन्त्रोक्ता देवताः । (१, ८) प्रथमाष्टम्योर्ऋचोः साम्नी त्रिष्टुप्, (२-४, ६) द्वितीयादिर्तृचस्य षष्ठ्याश्चार्च्यनुष्टुप्, (५) पञ्चम्याः [स्वराट्] आर्च्यनुष्टुप्, (७, ९, १०) सप्तमीनवमीदशमीनाञ्च प्राजापत्या त्रिष्टुप् छन्दांसि । सर्वा द्विपदाः ॥

अग्निं ते वसुवन्तमृच्छन्तु । ये माघायवः प्राच्या दिशोऽभिदासात् ॥१॥
वायुं तेऽन्तरिक्षवन्तमृच्छन्तु । ये माघायव एतस्या दिशोऽभिदासात् ॥२॥
सोमं ते रुद्रवन्तमृच्छन्तु । ये माघायवो दक्षिणाया दिशोऽभिदासात् ॥३॥

अग्निम् । ते । वसुऽवन्तम् । ऋच्छन्तु । ये । मा । अघऽयवः । प्राच्याः । दिशः । अभिऽदासान् ॥

वायुम् । ते । अन्तरिक्षऽवन्तम । ऋच्छन्तु । ये । मा । अघऽयवः । एतस्याः । दिशः । अभिऽदासान ॥ २ ॥

सोमम् । ते । रुद्रऽवन्तम् । ऋच्छन्तु । ये । मा । अघऽयवः । दक्षिणायाः । दिशः । अभिऽदासान् ॥ ३ ॥

XIX.17.8 May the resplendent Lord, along with Maruts (cloud-bearing winds) guard me from this direction (middle of the north and the east). I step in Him; in Him I take shelter; to that castle do I go. May He defend me; may He protect me. To Him I totally surrender myself. Svāhā.

XIX.17.9 May the Lord of creatures (Prajāpati), along with virility and respectability, guard me from the fixed quarter (i.e., nadir). I step in Him; in Him I take shelter; to that castle do I go. May He defend me; may He protect me. To Him I totally surrender myself. Svāhā.

XIX.17.10 May the Lord supreme (Bṛhaspati) along with all the bounties of Nature, guard me from the upward quarter (i.e., zenith). I step in Him; in Him I take shelter; to that castle do I go. May He defend me; may He protect me. To Him I totally surrender myself. Svāhā.

For protection : To various God.

XIX.18.1 To the adorable Lord with the Vasus, may they go (for their destruction), who, of sinful intent, invade me from the eastern quarter.

XIX.18.2 To the pervading Lord with the midspace, may they go (for their destruction), who, of sinful intent invade me from this direction (middle of the south).

XIX.18.3 To the blissful Lord with the Rudras, may they go (for their destruction), who, of sinful intent, invade me from the southern quarter.

वरुणं त आदित्यवन्तमृच्छन्तु । ये माघायव एतस्या दिशोऽभिदासात् ॥४॥
सूर्यं ते द्यावापृथिवीवन्तमृच्छन्तु । ये माघायवः प्रतीच्या दिशोऽभिदासात् ॥५॥
अपस्त ओषधीमतीर्ऋच्छन्तु । ये माघायव एतस्या दिशोऽभिदासात् ॥६॥
विश्वकर्माणं ते सप्तऋषिवन्तमृच्छन्तु । ये माघायव उदीच्या दिशोऽभिदासात् ॥७॥
इन्द्रं ते मरुत्वन्तमृच्छन्तु । ये माघायव एतस्या दिशोऽभिदासात् ॥८॥
प्रजापतिं ते प्रजननवन्तमृच्छन्तु । ये माघायवो ध्रुवाया दिशोऽभिदासात् ॥९॥
बृहस्पतिं ते विश्वदेववन्तमृच्छन्तु । ये माघायव ऊर्ध्वाया दिशोऽभिदासात् ॥१०॥

वरुणम् । ते । आदित्यऽवन्तम् । ऋच्छन्तु । ये । मा । अघऽयवः । एतस्याः । दिशः । अभिऽदासान् ॥ ४ ॥

सूर्यम् । ते । द्यावापृथिवीऽवन्तम् । ऋच्छन्तु । ये । मा । अघऽयवः । प्रतीच्याः । दिशः । अभिऽदासान् ॥ ५ ॥

अपः । ते । ओषधीऽमतीः । ऋच्छन्तु । ये । मा । अघऽयवः । एतस्याः । दिशः । अभिऽदासान् ॥ ६ ॥

विश्वऽकर्माणम् । ते । सप्तऋषिऽवन्तम् । ऋच्छन्तु ।
ये । मा । अघऽयवः । उदीच्याः । दिशः । अभिऽदासान् ॥ ७ ॥

इन्द्रम् । ते । मरुत्ऽवन्तम् । ऋच्छन्तु । ये । मा । अघऽयवः । एतस्याः । दिशः । अभिऽदासान् ॥ ८ ॥

प्रजाऽपतिम् । ते । प्रजननऽवन्तम् । ऋच्छन्तु । ये । मा । अघऽयवः । ध्रुवायाः । दिशः । अभिऽदासान् ॥ ९ ॥

बृहस्पतिम् । ते । विश्वदेवऽवन्तम् । ऋच्छन्तु । ये । मा । अघऽयवः । ऊर्ध्वायाः । दिशः । अभिऽदासान् ॥ १० ॥

XIX.18.4 To the venerable Lord with the suns (of twelve months), may they go (for their destruction), who of sinful intent, invade me from this direction (middle of the south and the west).

XIX.18.5 To the Sun (God) with the heaven and earth, may they go (for their destruction), who of sinful intent, invade me from the western quarter.

XIX.18.6 To the Waters with the medicinal plants, may they go (for their destruction), who, of sinful intent, invade me from this direction (middle of the west and the north).

XIX.18.7 To the universal Architect with the seven-seers, may they go (for their destruction), who, of sinful intent, invade me from the northern quarter.

XIX.18.8 To the resplendent Lord with Maruts (the cloud-bearing winds), may they go (for their destruction), who of sinful intent invade me from this direction (middle of the north and the east).

XIX.18.9 To the Lord of creatures with virility, may they go (for their destruction), who, of sinful intent, invade me from the fixed quarter (nadir).

XIX.18.10 To the Lord supreme with all the bounties of Nature,may they go (for their destruction), who, of sinful intent, invade me from the upward quarter (zenith).

(१९) एकोनविंशं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्याथर्वा ऋषिः। चन्द्रमा मन्त्रोक्ताश्च देवताः। (१, ३, ९) प्रथमातृतीया-नवमीनामृचां भुरिग्बृहती, (२, ४-८, ११) द्वितीयायाश्चतुर्थ्यादिपञ्चानामेकादश्याश्चानुष्टुब्गर्भा पङ्क्तिः, (१०) दशम्याश्च स्वराट् पङ्क्तिश्छन्दांसि ॥

मि॒त्रः पृ॑थि॒व्योद॑क्राम॒त्तां पुरं॒ प्र ण॑यामि वः ।
तामा वि॑शत॒ तां प्र वि॑शत॒ सा व॒: शर्म॑ च॒ वर्म॑ च यच्छतु ॥१॥
वा॒युर॒न्तरि॑क्षे॒णोद॑क्राम॒त्तां पुरं॒ प्र ण॑यामि वः ।
तामा वि॑शत॒ तां प्र वि॑शत॒ सा व॒: शर्म॑ च॒ वर्म॑ च यच्छतु ॥२॥
सूर्यो॑ दि॒वोद॑क्राम॒त्तां पुरं॒ प्र ण॑यामि वः ।
तामा वि॑शत॒ तां प्र वि॑शत॒ सा व॒: शर्म॑ च॒ वर्म॑ च यच्छतु ॥३॥
च॒न्द्रमा॒ नक्ष॑त्रै॒रुद॑क्राम॒त्तां पुरं॒ प्र ण॑यामि वः ।
तामा वि॑शत॒ तां प्र वि॑शत॒ सा व॒: शर्म॑ च॒ वर्म॑ च यच्छतु ॥४॥
सोम॒ ओष॑धीभि॒रुद॑क्राम॒त्तां पुरं॒ प्र ण॑यामि वः ।
तामा वि॑शत॒ तां प्र वि॑शत॒ सा व॒: शर्म॑ च॒ वर्म॑ च यच्छतु ॥५॥
य॒ज्ञो दक्षि॑णाभि॒रुद॑क्राम॒त्तां पुरं॒ प्र ण॑यामि वः ।
तामा वि॑शत॒ तां प्र वि॑शत॒ सा व॒: शर्म॑ च॒ वर्म॑ च यच्छतु ॥६॥

मि॒त्रः । पृ॒थि॒व्या । उत् । अ॒क्रा॒म॒त् । ताम् । पुर॑म् । प्र । न॒या॒मि । व॒: । ताम् । आ । वि॒श॒त । ताम् । प्र । वि॒श॒त । सा । व॒: । शर्म॑ । च॒ । वर्म॑ । च॒ । य॒च्छ॒तु॒ ॥ १ ॥

वा॒युः । अ॒न्तरि॑क्षेण । उत् । अ॒क्रा॒म॒त् । ताम् । पुर॑म् । प्र । न॒या॒मि । व॒: । ताम् । आ । वि॒श॒त । ताम् । प्र । वि॒श॒त । सा । व॒: । शर्म॑ । च॒ । वर्म॑ । च॒ । य॒च्छ॒तु॒ ॥ २ ॥

सूर्यः॑ । दि॒वा । उत् । अ॒क्रा॒म॒त् । ताम् । पुर॑म् । प्र । न॒या॒मि । व॒: । ताम् । आ । वि॒श॒त । ताम् । प्र । वि॒श॒त । सा । व॒: । शर्म॑ । च॒ । वर्म॑ । च॒ । य॒च्छ॒तु॒ ॥ ३ ॥

च॒न्द्रमाः॑ । नक्ष॑त्रैः । उत् । अ॒क्रा॒म॒त् । ताम् । पुर॑म् । प्र । न॒या॒मि । व॒: । ताम् । आ । वि॒श॒त । ताम् । प्र । वि॒श॒त । सा । व॒: । शर्म॑ । च॒ । वर्म॑ । च॒ । य॒च्छ॒तु॒ ॥ ४ ॥

सोमः॑ । ओष॑धीभिः । उत् । अ॒क्रा॒म॒त् । ताम् । पुर॑म् । प्र । न॒या॒मि । व॒: । ताम् । आ । वि॒श॒त । ताम् । प्र । वि॒श॒त । सा । व॒: । शर्म॑ । च॒ । वर्म॑ । च॒ । य॒च्छ॒तु॒ ॥ ५ ॥

य॒ज्ञः । दक्षि॑णाभिः । उत् । अ॒क्रा॒म॒त् । ताम् । पुर॑म् । प्र । न॒या॒मि । व॒: । ताम् । आ । वि॒श॒त । ताम् । प्र । वि॒श॒त । सा । व॒: । शर्म॑ । च॒ । वर्म॑ । च॒ । य॒च्छ॒तु॒ ॥ ६ ॥

For protection : To Various Gods

XIX.19.1 The fire rose up with the earth; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

XIX.19.2 The wind rose up with the midspace; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

XIX.19.3 The sun rose up with the sky; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

XIX.19.4 The moon rose up with the asterisms; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

XIX.19.5 Soma (the cure-juice) rose up with the herbs; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

XIX.19.6 The sacrifice rose up with the sacrificial gifts; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

समुद्रो नदीभिरुदक्रामत्तां पुरं प्र णयामि वः ।
तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥७॥
ब्रह्म ब्रह्मचारिभिरुदक्रामत्तां पुरं प्र णयामि वः ।
तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥८॥
इन्द्रो वीर्येणोदक्रामत्तां पुरं प्र णयामि वः ।
तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥९॥
देवा अमृतेनोदक्रामंस्तां पुरं प्र णयामि वः ।
तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥१०॥
प्रजापतिः प्रजाभिरुदक्रामत्तां पुरं प्र णयामि वः ।
तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥११॥

समुद्रः । नदीभिः । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः । ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ ७ ॥

ब्रह्म । ब्रह्मचारिऽभिः । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः । ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ ८ ॥

इन्द्रः । वीर्येण । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः । ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ ९ ॥

देवाः । अमृतेन । उत् । अक्रामन् । ताम् । पुरम् । प्र । नयामि । वः । ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ १० ॥

प्रजाऽपतिः । प्रऽजाभिः । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः । ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ ११ ॥

XIX.19.7 The ocean rose up with the rivers; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

XIX.19.8 The sacred knowledge rose up with the seekers of sacred knowledge; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

XIX.19.9 The resplendent self rose up with the valour; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

XIX.19.10 The enlightened ones rose up with the immortality; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

XIX.19.11 The Lord of creatures rose up with the offsprings; I lead you forward to that castle; reach it; enter it. May it offer you happiness as well as protection.

(२०) विंशं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्याथर्वा ऋषिः । मन्त्रोक्ता देवताः । (१) प्रथमर्चस्त्रिष्टुप्, (२) द्वितीयाया जगती, (३) तृतीयायाः पुरस्ताद्बृहती, (४) चतुर्थ्याश्चानुष्टुप् छन्दांसि ॥

अप न्यधुः पौरुषेयं वधं यमिन्द्राग्नी धाता सविता बृहस्पतिः ।
सोमो राजा वरुणो अश्विना यमः पूषास्मान्परि पातु मृत्योः ॥१॥
यानि चकार भुवनस्य यस्पतिः प्रजापतिर्मातरिश्वा प्रजाभ्यः ।
प्रदिशो यानि वसते दिशश्च तानि मे वर्माणि बहुलानि सन्तु ॥२॥
यत्ते तनूष्वनह्यन्त देवा द्युराजयो देहिनः ।
इन्द्रो यच्चक्रे वर्म तदस्मान्पातु विश्वतः ॥३॥
वर्म मे द्यावापृथिवी वर्माहर्वर्म सूर्यः ।
वर्म मे विश्वे देवाः क्रन्मा मा प्रापत्प्रतीचिका ॥४॥

अप । न्यधुः । पौरुषेयम् । वधम् । यम् । इन्द्राग्नी इति । धाता । सविता । बृहस्पतिः ।
सोमः । राजा । वरुणः । अश्विना । यमः । पूषा । अस्मान् । परि । पातु । मृत्योः ॥ १ ॥
यानि । चकार । भुवनस्य । यः । पतिः । प्रजाऽपतिः । मातरिश्वा । प्रऽजाभ्यः ।
प्रऽदिशः । यानि । वसते । दिशः । च । तानि । मे । वर्माणि । बहुलानि । सन्तु ॥२॥
यत् । ते । तनूषु । अनह्यन्त । देवाः । द्युऽराजयः । देहिनः ।
इन्द्रः । यत् । चक्रे । वर्म । तत् । अस्मान् । पातु । विश्वतः ॥ ३ ॥
वर्म । मे । द्यावापृथिवी इति । वर्म । अहः । वर्म । सूर्यः ।
वर्म । मे । विश्वे । देवाः । क्रन् । मा । मा । प्र । आपत् । प्रतीचिका ॥ ४ ॥

(२१) एकविंशं सूक्तम्

(१) एकर्चस्यास्य सूक्तस्य ब्रह्मा ऋषिः । छन्दांसि देवताः । एकावसाना द्विपदा साम्नी बृहती छन्दः ॥

गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्तिस्त्रिष्टुब्जगत्यै ॥१॥

गायत्री । उष्णिक् । अनुऽस्तुप् । बृहती । पङ्क्तिः । त्रिऽस्तुप् । जगत्यै ॥ १ ॥

For protection by various Gods

XIX.20.1 From the deadly weapon, which the foemen have secretly sent towards us, may the Lord resplendent and adorable and sustainer, the impeller Lord, the lord supreme, the blissful Lord, the venerable king, the twins-divine, the Controller Lord, the nourisher Lord fully protect us from that death.

XIX.20.2 Whatever He, who is the Lord of universe and the Lord of creatures breathing in the midspace, has made an armour for His creatures, and what the quarters and the mid-quarters put on, may all those be my ample defenses.

XIX.20.3 What (armour) those bounties of Nature, shining in the sky, assuming bodily form, put on their bodies, what the resplendent self makes an armour for himself, may that protect us from all sides.

XIX.20.4 May heaven and earth be my armour; (my) armour be the day; armour be the sun. May all the bounties of Nature make my armour. May the calamity (army of enemies) never reach me.

The Chandas : the meters

XIX.21.1 (Svāhā) to Gāyatrī, Usnik, Anuśtup, Brhatī, Pañkti, Tristup and Jagatī.

(२२) द्वाविंशं सूक्तम्

(१-२१) एकविंशत्यृचस्यास्य सूक्तस्याङ्गिरा ऋषिः । मन्त्रोक्ता देवताः । (१) प्रथमर्चः साम्न्युष्णिक्, (२, ६, १४-२०) द्वितीयाषष्ठयोश्चतुर्दश्यादिदृचस्य विंश्याश्च दैवी पङ्क्तिः, (३, १९) तृतीयैकोनविंश्योः प्राजापत्या गायत्री, (४, ७, ११, १७) चतुर्थीसप्तम्येकादशीसप्तदशीनां दैवी जगती, (५, १२-१३) पञ्चमीद्वादशी-त्रयोदशीनां दैवी त्रिष्टुप्, (८-१०) अष्टम्यादितृचस्यासुरी जगती, (१८) अष्टादश्या आसुर्यनुष्टुप् (एता एकावसानाः), (२१) एकविंश्याश्च चतुष्पदा त्रिष्टुप् छन्दांसि ॥

आङ्गिरसानामाद्यैः पञ्चानुवाकैः स्वाहा ॥१॥ षष्ठाय स्वाहा ॥२॥
सप्तमाष्टमाभ्यां स्वाहा ॥३॥ नीलनखेभ्यः स्वाहा ॥४॥
हरितेभ्यः स्वाहा ॥५॥ क्षुद्रेभ्यः स्वाहा ॥६॥
पर्यायिकेभ्यः स्वाहा ॥७॥ प्रथमेभ्यः शङ्खेभ्यः स्वाहा ॥८॥
द्वितीयेभ्यः शङ्खेभ्यः स्वाहा ॥९॥ तृतीयेभ्यः शङ्खेभ्यः स्वाहा ॥१०॥
उपोत्तमेभ्यः स्वाहा ॥११॥ उत्तमेभ्यः स्वाहा ॥१२॥

आङ्गिरसानाम् । आद्यैः । पञ्च । अनुऽवाकैः । स्वाहा ॥ १ ॥

षष्ठाय । स्वाहा ॥ २ ॥

सप्तमऽअष्टमाभ्याम् । स्वाहा ॥ ३॥

नीलऽनखेभ्यः । स्वाहा ॥४॥

हरितेभ्यः । स्वाहा ॥ ५ ॥

क्षुद्रेभ्यः । स्वाहा ॥ ६ ॥

पर्यायिकेभ्यः । स्वाहा ॥ ७ ॥

प्रथमेभ्यः । शङ्खेभ्यः । स्वाहा ॥ ८ ॥

द्वितीयेभ्यः । शङ्खेभ्यः । स्वाहा ॥ ९ ॥

तृतीयेभ्यः । शङ्खेभ्यः । स्वाहा ॥१०॥

उपऽउत्तमेभ्यः । स्वाहा ॥ ११ ॥

उत्ऽतमेभ्यः । स्वाहा ॥१२॥

Homage to the parts of Atharva Veda

XIX.22.1 Svāhā with the first five Anuvākas (chapters) of Atharva Veda (the compositions of Angiras).

XIX.22.2 Svāhā to the sixth (chapter).

XIX.22.3 Svāhā to the seventh and the eighth (chapter).

XIX.22.4 Svāhā with the (chapters called) Nīlnakha.

XIX.22.5 Svāhā with the (verses called) Hatitas.

XIX.22.6 Svāhā to small (chapters or hymns).

XIX.22.7 Svāhā to the chapters containing Paryāyas (hymns containing regularly recurring phrases or sentences).

XIX.22.8 Svāhā to the chapters containing the first Śankhas (a particular type of mantras).

XIX.22.9 Svāhā to the chapters containing the second Śandkhas.

XIX.22.10 Svāhā to the chapters containing the third Śankhas.

XIX.22.11 Svāhā to the hymns of the last but one chapter.

XIX.22.12 Svāhā to the hymns of the last chapter.

उत्तरेभ्यः स्वाहा ॥१३॥ ऋषिभ्यः स्वाहा ॥१४॥
शिखिभ्यः स्वाहा ॥१५॥ गणेभ्यः स्वाहा ॥१६॥
महागणेभ्यः स्वाहा ॥१७॥ सर्वेभ्योङ्गिरोभ्यो विदगणेभ्यः स्वाहा ॥१८॥
पृथक्सहस्राभ्यां स्वाहा ॥१९॥ ब्रह्मणे स्वाहा ॥२०॥
ब्रह्मज्येष्ठा संभृता वीर्याणि ब्रह्माग्रे ज्येष्ठं दिवमा ततान।
भूतानां ब्रह्मा प्रथमोत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः ॥२१॥

उत्ऽतरेभ्यः । स्वाहा ॥ १३ ॥
ऋषिऽभ्यः । स्वाहा ॥१४॥
शिखिऽभ्यः । स्वाहा ॥ १५ ॥
गणेभ्यः । स्वाहा ॥ १६॥
महाऽगणेभ्यः । स्वाहा ॥ १७ ॥
सर्वेभ्यः । अङ्गिरःऽभ्यः । विदऽगणेभ्यः । स्वाहा ॥ १८ ॥
पृथक्ऽसहस्राभ्याम् । स्वाहा । १९॥
ब्रह्मणे । स्वाहा ॥ २० ॥
ब्रह्मऽज्येष्ठा । समऽभृता । वीर्याणि । ब्रह्म । अग्रे । ज्येष्ठम् । दिवम् । आ । ततान ।
भूतानाम् । ब्रह्मा । प्रथमः । उत । जज्ञे । तेन । अर्हति । ब्रह्मणा । स्पर्धितुम् । कः ॥

XIX.22.13 Svāhā to the latter hymns.

XIX.22.14 Svāhā to the seers.

XIX.22.15 Svāhā to the learning pupils.

XIX.22.16 Svāhā to Gaṇas (assemblies of seers).

XIX.22.17 Svāhā to large ganas.

XIX.22.18 Svāhā to all the Aṅgirases, known to Ganas.

XIX.22.19 Svāhā to the two with a thousand each severally.

XIX.22.20 Svāhā to the Divine supreme.

XIX.22.21 All the valours collected are surpassed by the Divine supreme spread out the sky. The Divine supreme existed before the beings were born. So who can dare to compete with that Divine supreme.

(२३) त्रयोविंशं सूक्तम्

(१-३०) त्रिंशदृचस्यास्य सूक्तस्याथर्वा ऋषिः । मन्त्रोक्ताश्चन्द्रमा वा देवता । (१) प्रथमर्च आसुरी बृहती, (२-७, २०, २३, २७) द्वितीयादितृचद्वयस्य विंशीत्रयोविंशीसप्तविंशीनाञ्च दैवी त्रिष्टुप्, (८, १०-१२, १४-१६) अष्टम्या दशम्यादितृचस्य चतुर्दश्यादितृचस्य च प्राजापत्या गायत्री, (१७, १९, २१, २४-२५, २९) सप्तदश्येकोनविंश्येकविंशीचतुर्विंशीपञ्चविंश्येकोनत्रिंशीनां दैवी पङ्क्तिः, (९, १३, १८, २२, २६, २८) नवमीत्रयोदश्यष्टादशीद्वाविंशीषड्विंश्यष्टाविंशीनां दैवी जगती, (एता एकावसानाः), (३०) त्रिंशयाश्च चतुष्पदा त्रिष्टुप् छन्दांसि ॥

आ॒थ॒र्व॒णानां॑ चतुर्ऋ॒चेभ्यः॒ स्वाहा॑ ॥१॥ प॒ञ्च॒र्चेभ्यः॒ स्वाहा॑ ॥२॥
ष॒डृ॒चेभ्यः॒ स्वाहा॑ ॥३॥ स॒प्त॒र्चेभ्यः॒ स्वाहा॑ ॥४॥
अ॒ष्ट॒र्चेभ्यः॒ स्वाहा॑ ॥५॥ न॒व॒र्चेभ्यः॒ स्वाहा॑ ॥६॥
द॒श॒र्चेभ्यः॒ स्वाहा॑ ॥७॥ ए॒का॒द॒श॒र्चेभ्यः॒ स्वाहा॑ ॥८॥
द्वा॒द॒श॒र्चेभ्यः॒ स्वाहा॑ ॥९॥ त्र॒यो॒द॒श॒र्चेभ्यः॒ स्वाहा॑ ॥१०॥
च॒तु॒र्द॒श॒र्चेभ्यः॒ स्वाहा॑ ॥११॥ प॒ञ्च॒द॒श॒र्चेभ्यः॒ स्वाहा॑ ॥१२॥

आ॒थ॒र्व॒णाना॑म् । च॒तुः॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ १ ॥

प॒ञ्च॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ २ ॥

ष॒ट्ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ ३ ॥

स॒प्त॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ ४ ॥

अ॒ष्ट॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ ५ ॥

न॒व॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ ६ ॥

द॒श॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ ७ ॥

ए॒का॒द॒श॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ ८ ॥

द्वा॒द॒श॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ ९ ॥

त्र॒यो॒द॒श॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ १० ॥

च॒तु॒र्द॒श॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ ११ ॥

प॒ञ्च॒द॒श॒ऽऋ॒चेभ्यः॑ । स्वाहा॑ ॥ १२ ॥

Homage to the parts of Atharva Veda

XIX.23.1 Svāhā to the four-versed (hymns) of the Atharva Veda (the song of Atharvan).

XIX.23.2 Svāhā to the five-versed ones.

XIX.23.3 Svāhā to the six-versed ones.

XIX.23.4 Svāhā to the seven-versed ones.

XIX.23.5 Svāhā to the eight-versed ones.

XIX.23.6 Svāhā to the nine-versed ones.

XIX.23.7 Svāhā to the ten-versed ones.

XIX.23.8 Svāhā to the eleven-versed ones.

XIX.23.9 Svāhā to the twelve-versed ones.

XIX.23.10 Svāhā to the thirteen-versed ones.

XIX.23.11 Svāhā to the fourteen-versed ones.

XIX.23.12 Svāhā to the fifteen-versed ones.

षोडशर्चेभ्यः स्वाहा ॥१३॥ सप्तदशर्चेभ्यः स्वाहा ॥१४॥
अष्टादशर्चेभ्यः स्वाहा ॥१५॥ एकोनविंशतिः स्वाहा ॥१६॥
विंशतिः स्वाहा ॥१७॥ महत्काण्डाय स्वाहा ॥१८॥
तृचेभ्यः स्वाहा ॥१९॥ एकर्चेभ्यः स्वाहा ॥२०॥
क्षुद्रेभ्यः स्वाहा ॥२१॥ एकानृचेभ्यः स्वाहा ॥२२॥
रोहितेभ्यः स्वाहा ॥२३॥ सूर्याभ्यां स्वाहा ॥२४॥

षोडशऽऋचेभ्यः । स्वाहा ॥ १३ ॥
सप्तदशऽऋचेभ्यः । स्वाहा ॥१४॥
अष्टादशऽऋचेभ्यः । स्वाहा ॥१५॥
एकोनविंशतिः । स्वाहा ॥ १६ ॥
विंशतिः । स्वाहा ॥ १७ ॥
महत्ऽकाण्डाय । स्वाहा ॥ १८ ॥
तृचेभ्यः । स्वाहा ॥ १९ ॥
एकऽऋचेभ्यः । स्वाहा ॥ २० ॥
क्षुद्रेभ्यः । स्वाहा ॥ २१ ॥
एकऽअनृचेभ्यः । स्वाहा ॥ २२ ॥
रोहितेभ्यः । स्वाहा ॥ २३ ॥
सूर्याभ्याम् । स्वाहा ॥ २४ ॥

XIX.23.13 Svāhā to the sixteen-versed ones.

XIX.23.14 Svāhā to the seventeen-versed ones.

XIX.23.15 Svāhā to the eighteen-versed ones.

XIX.23.16 Svāhā to nineteen.

XIX.23.17 Svāhā to twenty.

XIX.23.18 Svāhā to the great kaṇda (book or chapter).

XIX.23.19 Svāhā to the three-versed ones.

XIX.23.20 Svāhā to the one-versed ones.

XIX.23.21 Svāhā to the small ones.

XIX.23.22 Svāhā to the non-Ṛk-single-versed ones.

XIX.23.23 Svāhā to the ones about Rohita (sun).

XIX.23.24 Svāhā to the two about Sūrya (maiden to be married).

ब्रात्याभ्यां स्वाहा ॥२५॥ प्राजापत्याभ्यां स्वाहा ॥२६॥
विषासहै स्वाहा ॥२७॥ मङ्गलिकेभ्यः स्वाहा ॥२८॥
ब्रह्मणे स्वाहा ॥२९॥
ब्रह्मज्येष्ठा संभृता वीर्याणि ब्रह्माग्रे ज्येष्ठं दिवमा ततान।
भूतानां ब्रह्मा प्रथमोत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः ॥३०॥

ब्रात्याभ्याम् । स्वाहा ॥ २५ ॥

प्राजाऽपत्याभ्याम् । स्वाहा ॥२६॥

वि॒ऽससहै । स्वाहा ॥ २७ ॥

मङ्गलिकेभ्यः । स्वाहा ॥ २८ ॥

ब्रह्मणे । स्वाहा ॥ २९ ॥

ब्रह्मऽज्येष्ठा । समऽभृता । वीर्याणि । ब्रह्म । अग्रे । ज्येष्ठम् । दिवम् । आ । ततान ।
